# ADVERTISEMENT.

The following work was more than half printed, when Dr. Ballantyne left this country for his new post in London, and the remaining sheets were carried through the press by Professor Griffith, his successor in the Benares Sanskrit College.

We extract from the preface to the editor's prize essay on "Christianity contrasted with Hindu philosophy," the following remarks on the work itself.

"There are some Sanskrit books yet untranslated, which the writer must study before deciding upon his theological terminology for India. Among these works is the *Aphorisms of S'áṇḍilya*. S'áṇḍilya rejects the Hindú (gnostic) theory that knowledge is the one thing needful, and contends that knowledge is only the handmaid of *faith*."

Hence, besides its intrinsic value as illustrating a peculiar phase of the Vedánta philosophy, S'áṇḍilya's work has an additional value as bearing on the question of the proper Sanskrit phraseology for theological controversy.

Dr. Ballantyne hopes to publish hereafter a translation of the Aphorisms, if his present engagements allow him leisure to complete it.

E. B. C.

*Secretary, B. A. S.*

# शुद्धिपत्रम्।

| पत्रम्। | पङ्क्ति। | अशुद्धम्। | शुद्धम्। |
|---|---|---|---|
| ७ | २० | तदपेक्षायां | तदपेक्षया |
| १७ | ३ | ज्ञानब्रह्मणो | ज्ञातब्रह्मणो |
| २३ | १३ | तज्जलानिति | तज्जलानीति |
| ४६ | १० | भगवते दत्त नैवे-द्यनिर्माल्यादिकं | भगवते दत्तं नैवेद्यमाल्यादिकं |
| ४८ | २२ | तया | तया |
| ६९ | १२ | करणासम्बन्धस्य | करणसम्बन्धस्य |

इति श्रुतम्। तथा (नृसिंहपु०।अ०।श्लो०) भक्त्यैकलभ्ये पुरुषे पुराणे मुक्तौ किमर्थं क्रियते न यत्न इति। तस्मात् परभक्तिमात्रेण बुद्धेरत्यन्तलये सति ब्रह्मानन्दावाप्तिलक्षणा मुक्तिरित्यर्थः। तथाच तदीयबुद्धिविलयप्रागभावसहवृत्तिब्रह्मानन्दावाप्तिर्मुक्तिरिति तल्लक्षणं सूचितम्। अथ ब्रह्मानन्दावाप्तेः सिद्धत्वेनापुरुषार्थत्वमिति चेन्न ग्रामादिवद्विशिष्टतया पुमर्थत्वात्। अत्र बुद्धिर्जीवोपाधिर्मता भगवत एव बुद्धितत्त्वाभ्युपगमात्। अन्यथा इदं सुखमत्र सुखत्वमिति ज्ञानाज्ज्ञातेर्नित्यतया तद्विशिष्टस्य पुमर्थाभावप्रसङ्गात् ईहाकृत्योर्विकल्पकलाभावात्। तस्मादसिद्धोपरागेण सिद्धे अपीच्छाकृती इति। कृत्यसाध्यत्वज्ञानं प्रतिबन्धकमिति चेत् श्येनादौ बलवदनिष्टानुबन्धित्वतिरोधानादिवोत्कटरागेण कृत्यसाध्यत्वमपि तिरोधाय प्रवर्त्तितमिति किमनुपपन्नम्। आनन्दं ब्रह्मणो रूपं तच्च मोक्षे प्रतिष्ठितमित्यागमादपि तथात्वमध्यवसेयमिति ॥ ९६ ॥

अथ परभक्तिसिद्धौ जीवनादृष्टभोगवदितरेषामपूर्वाणामपि भोगेनैव लय इत्यनिर्मोक्ष एव स्यादित्यत उच्यते।

आयुश्चिरमितरेषां तु हानिरनास्पदत्वात् ॥ ९७ ॥

आत्मरतौ सत्यां (छां०।प्र०४६०) तस्य तावदेव चिरं यावन्न विमोक्ष्ये अथ सम्पत्स्य इति। तथा (विष्णुपु०।अं०१।अ०२०।श्लो०२०)

धर्मार्थकामैः किं तस्य मुक्तिस्तस्य करे स्थिता।
समस्तजगतां मूले यस्य भक्तिः स्थिरा त्वयि ॥ १ ॥

तथाच आयुर्जीवनादृष्टं तन्मात्रमेव चिरं परभक्तौ सत्यामपि मुक्तिप्रतिबन्धकं तावदेव जीवन्मुक्तिः। इतरेषां धर्माधर्माणां जीवनादृष्टलये सति बुद्धेरत्यन्तलये भोगास्पदस्याभावाद्बुद्धिभोगाभाव एवेति नानिर्मोच इति बुद्धेरपि विकार्यत्वेन कारणत्वात्। नापि तददृष्टाहेतुत्वं कारणान्तराभावे फलानिष्पत्तावपि हेतुत्वाच्यतेः। तस्य भगवत्तोषरोषरूपस्यापि लयः कालात् प्रलयसामग्रीतो वा यथाङ्गापूर्वाणामङ्गवैगुण्याद-जनितपरमापूर्वाणां लय इति। ब्रह्मार्पणं तु प्रतिबन्धकीभूतकर्मणामबन्धायेति सर्वमनवद्यम्। परंपरयैव ज्ञानाग्निना कर्मचय इति॥ ९७॥

**संसृतिरेषामभक्तिः स्यान्नाज्ञानात् कारणासिद्धेः॥ ९८॥**

अथ जीवस्य संसारः किमज्ञानकृतो मतः।
उताभक्तिकृतस्तत्र सूत्रमेतत् प्रवर्त्तते॥ १॥
स्वर्गोऽथ जीवन्मुक्तत्वं मुक्तिरेषां त्रयी गतिः।
जीवन्मुक्तिः परा भक्तिस्तदसिद्धिस्तु संसृतिः॥ २॥
सापि भक्तेः कामनानामभावादेव तिष्ठति।
भक्तौ सत्यां निवर्त्तेत तथाचोक्तं महर्षिभिः॥ ३॥

(विष्णुपु०।अं०१।अ०९।श्लो०५९)।

तावदार्त्तिस्तु सा वाञ्छा तावन्मोहस्तथा सुखम्।
यावन्नायाति शरणं त्वामशेषाघमोचनम्॥ १॥
तत्त्वाज्ञानकृता सृष्टिर्ज्ञानात्तद्धानिरिष्यते।
रज्जुसर्पादिहेतूनामभावात् तदसम्भवात्॥ ४॥

जन्मानि घोरयमकिङ्करताडनानि
दैन्यानि तानि तपनात्मजदर्शनानि।
जन्तोरहंममतरङ्गकुरङ्गतृष्णा-
कृष्णाङ्घ्रिपङ्कजपराङ्मुखतानुभावः॥ इति॥ ९८॥

त्रीण्येषां नेत्राणि शब्दलिङ्गाक्षभेदाद्रुद्रवत्॥ ९९॥

एषां जीवानां त्रीणि नयनानि साधनानि अर्थप्रमितै प्रमाणभूतानीति यावत्। प्रमितत्वाविशेषेऽपि करणत्रैविध्यात् त्रैविध्यम्। तानि यथा ज्ञायमानयोग्यपदपदार्थरूप शब्दः शाब्दप्रमाकरणम्। तस्य प्रथममभिधानमलौकिकभक्ते स्तत्साधनतादौ प्राधान्यकथनार्थम्। तथा ज्ञायमानव्याप्यपक्ष धर्मलिङ्गज्ञानमनुमितिकरणमस्माकं सत्कार्यत्वाज्ज्ञायमानत्वम प्यविरुद्धम्। प्रत्यक्षप्रमितिकरणान्यक्षाणि विषयसम्बद्धानि तानि च मनःश्रोत्रत्वक्चक्षूरसनघ्राणानि षट् स्वसम्बन्धेनान्तःकरणस्तमोऽभिभूय चिदात्मप्रकाशमानार्थाकारां सत्त्ववृत्तिं जनयन्ति अत एवोक्तम् (गी०अ०१४।श्लो०११) सर्वद्वारेषु देहेऽस्मिन् प्रकाश उपजायते इति। जीवबुद्धिरूपमनसो दुःखादिविकारास्तु नाज्ञाताः सन्तीत्यात्मप्रकाशेनैव प्रकाश्यन्त इति न तत्र सत्त्ववृत्त्यवकल्पनं गौरवात्। एतदेव साक्षिभास्यत्वम्। एवं शब्दानुमानप्रत्यक्षभेदात् त्रीण्येव यथा रुद्रस्य त्रीणि चक्षुरधिष्ठानानि नाधिकानि न न्यूनानि तद्वच्चन्द्रसूर्याग्निरूपत्वचिह्नानि। उपमानं तु शक्तिग्रहमात्रार्थं तच्च सामान्यतो

दृष्टानुमानसहकारेण प्रसिद्धपदसामानाधिकरण्यात् कविकाव्य परिच्छेदवन्मानमपि सम्भवतीति त्रिष्वेवान्तर्भूतमिति न पृथक्। प्रमाणविचारोऽस्माभिर्न्यायतत्त्वनिकषे वेदान्ततत्त्वनिकषे च निरूपित इति नेह प्रतन्यते।

जीवबुद्धिर्मनो नाम तत् सङ्कोचविकासवत्।
यौगपद्यायौगपद्ये धियां तेनोपपद्यते ॥ १ ॥
ईश्वराऽहंकृतेर्जीवबुद्धीनामुद्भवो यतः।
बुद्धौ दुःखादिवत् साचादहन्त्वमपि गृह्यते ॥ २ ॥
मात्राभूतेन्द्रियादीनां भगवद्बुद्धिजन्मतः।
भगवद्बुद्धिबोद्धृत्वाच्चिदाग्राह्यं तथेन्द्रियैः ॥ ३ ॥
भूतानि पञ्च तन्मात्राः पञ्च चैकादशेन्द्रियम्।
अहम्बुद्धिप्रधानात्मपरेशास्तत्त्वसंग्रहः ॥ ४ ॥

इति षड्विंशतितत्त्वानि ॥ ९९ ॥

**अविस्तरो भावाविकाराः स्युः क्रियाफलसंयोगात् ॥ १०० ॥**

प्रसङ्गादुत्पत्तिलयौ चिन्त्येते तत्रोत्पत्तिराविर्भावलक्षणा सत एव क्रियायोग्यता तथा तिरोभावस्तदयोग्यता एवं वृद्धि-ह्रानादयो विकारा एव भवन्ति। कुतः। करोति घटं नाशयति घटमित्यादौ धात्वर्थफलसम्बन्धव्यपदेशात् ते च सत एव घटन्ते नासतः। तथाचोक्तम्। (गी०।अ०२।श्लो०१६) नासतो विद्यते भावो नाभावो विद्यते सत इति। एवं भवति नश्यतीत्यादावपि क्रियाश्रयत्वं प्रतीयते। तच्च सत एव सम्भवति। सचाद्यक्षणसम्बन्धो नाशप्रतियोगित्वं च तदर्थः आद्य-

